# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय १

प्राप्तराजस्य रामस्य राक्षसानां वधे कृते ।
आजग्मुरृषयः सर्वे राघवं प्रतिनन्दितुम् ॥ १॥

कौशिकोऽथ यवक्रीता रौभ्यश् च्यवन एव च ।
कण्वो मेधातिथेः पुत्रः पूर्वस्यां दिशि ये श्रिताः ॥ २॥

स्वस्त्यात्रेयश्च भगवान्नमुचिः प्रमुचुस्तथा ।
आजग्मुस्ते सहागस्त्या ये श्रिता दक्षिणां दिशम् ॥ ३॥

पृषद्गुः कवषो धौम्यो रौद्रेयश्च महानृषिः ।
तेऽप्याजग्मुः सशिष्या वै ये श्रिताः पश्चिमां दिशम् ॥ ४॥

वसिष्ठः कश्यपोऽथात्रिर्विश्वामित्रोऽथ गौतमः ।
जमदग्निर्भरद्वाजस्तेऽपि सप्तमहर्षयः ॥ ५॥

सम्प्राप्यैते महात्मानो राघवस्य निवेशनम् ।
विष्ठिताः प्रतिहारार्थं हुताशनसमप्रभाः ॥ ६॥

प्रतिहारस्ततस्तूर्णमगस्त्यवचनादथ ।
समीपं राघवस्याशु प्रविवेश महात्मनः ॥ ७॥

स रामं दृश्य सहसा पूर्णचन्द्रसमद्युतिम् ।
अगस्त्यं कथयामास सम्प्रातमृषिभिः सह ॥ ८॥

श्रुत्वा प्राप्तान्मुनींस्तांस्तु बालसूर्यसमप्रभान् ।
तदोवाच नृपो द्वाःस्थं प्रवेशय यथासुखम् ॥ ९॥

दृष्ट्वा प्राप्तान्मुनींस्तांस्तु प्रत्युत्थाय कृताञ्जलिः ।
रामोऽभिवाद्य प्रयत आसनान्यादिदेश ह ॥ १०॥

तेषु काञ्चनचित्रेषु स्वास्त्रीर्णेषु सुखेषु च ।
यथार्हमुपविष्टास्ते आसनेष्वृषिपुङ्गवाः ॥ ११॥

रामेण कुशलं पृष्ठाः सशिष्याः सपुरोगमाः ।
महर्षयो वेदविदो रामं वचनमब्रुवन् ॥ १२॥

कुशलं नो महाबाहो सर्वत्र रघुनन्दन ।
त्वां तु दिष्ट्या कुशलिनं पश्यामो हतशात्रवम् ॥ १३॥

न हि भारः स ते राम रावणो राक्षसेश्वरः ।
सधनुस्त्वं हि लोकांस्त्रीन्विजयेथा न संशयः ॥ १४॥

दिष्ट्या त्वया हतो राम रावणः पुत्रपौत्रवान् ।
दिष्ट्या विजयिनं त्वाद्य पश्यामः सह भार्यया ॥ १५॥

दिष्ट्या प्रहस्तो विकटो विरूपाक्षो महोदरः ।
अकम्पनश्च दुर्धर्षो निहतास्ते निशाचराः ॥ १६॥

यस्य प्रमाणाद्विपुलं प्रमाणं नेह विद्यते ।
दिष्ट्या ते समरे राम कुम्भकर्णो निपातितः ॥ १७॥

दिष्ट्या त्वं राक्षसेन्द्रेण द्वन्द्वयुद्धमुपागतः ।
देवतानामवध्येन विजयं प्राप्तवानसि ॥ १८॥

सङ्ख्ये तस्य न किं चित्तु रावणस्य पराभवः ।
द्वन्द्वयुद्धमनुप्राप्तो दिष्ट्या ते रावणिर्हतः ॥ १९॥

दिष्ट्या तस्य महाबाहो कालस्येवाभिधावतः ।
मुक्तः सुररिपोर्वीर प्राप्तश्च विजयस्त्वया ॥ २०॥

विस्मयस्त्वेष नः सौम्य संश्रुत्येन्द्रजितं हतम् ।
अवध्यः सर्वभूतानां महामायाधरो युधि ॥ २१॥

दत्त्वा पुण्यामिमां वीर सौम्यामभयदक्षिणाम् ।
दिष्ट्या वर्धसि काकुत्स्थ जयेनामित्रकर्शन ॥ २२॥

श्रुत्वा तु वचनं तेषामृषीणां भावितात्मनाम् ।
विस्मयं परमं गत्वा रामः प्राञ्जलिरब्रवीत् ॥ २३॥

भवन्तः कुम्भकर्णं च रावणं च निशाचरम् ।
अतिक्रम्य महावीर्यौ किं प्रशंसथ रावणिम् ॥ २४॥

महोदरं प्रहस्तं च विरूपाक्षं च राक्षसं ।
अतिकम्य महावीर्यान्किं प्रशंसथ रावणिम् ॥ २५॥

कीदृशो वै प्रभावोऽस्य किं बलं कः पराक्रमः ।

केन वा कारणेनैष रावणादतिरिच्यते ॥ २६ ॥

कथं शक्रो जितस्तेन कथं लब्धवरश्च सः ॥ २७ ॥

शक्यं यदि मया श्रोतुं न खल्वाज्ञापयामि वः ।
यदि गुह्यं न चेद्वक्तुं श्रोतुमिच्छामि कथ्यताम् ।

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com